उच्यन्ते। (उपसंव्याने)––अन्तरे शाटकाः, अन्तराः शाटकाः। उपसंव्यानं परिधानीयमुच्यते, न [1]प्रावरणीयम्। बहिर्योगोपसंव्यानयोः इति किम्? [2]अनयोः ग्रामयोरन्तरे तापसः प्रतिवसति। [3]तस्मिन्नन्तरे शीतान्युदकानि। [4]मध्यप्रदेश-वचनोऽन्तरशब्दः। गणसूत्रस्य [5]चेदं प्रत्युदाहरणम्।

[५] अपुरीति वक्तव्यम्। (म. भा. १.९३.)
अन्तरायां पुरि वसति।

[६] [6]विभाषाप्रकरणे तीयस्य वा ङित्सु[7] सर्वनामसञ्ज्ञा इत्युपसंख्यानम्। (म. भा. १.९३)
द्वितीयस्मै, द्वितीयाय। तृतीयस्मै, तृतीयाय॥

## स्वरादिनिपातमव्ययम्। (३७/४४७)

स्वरादीनि शब्दरूपाणि निपाताश्च अव्ययसञ्ज्ञानि भवन्ति। [8]स्वर्, अन्तर्, प्रातर्, एते अन्तोदात्ताः [9]पठ्यन्ते। पुनर् आद्युदात्तः। सनुतर्[10], उच्चैस्, नीचैस्, शनैस्, ऋधक्,[11] आरात्, ऋते, युगपत्, पृथक्, [12]एतेऽपि सनुतर्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते[13]। ह्यस्, श्वस्, दिवा, रात्रौ[14], सायम्, चिरम्, मनाक्, ईषत्[15], जोषम्, तूष्णीम्, बहिस्, [16]आविस्, अवस्, अधस्, समया, निकषा, स्वयम्, मृषा, [17]नक्तम्, नञ्, हेतौ, अद्धा,[18] इद्धा, सामि,[19] एतेऽपि ह्यस्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते। वत्–[20]वदन्तमव्ययसञ्ज्ञं भवति। ब्राह्मणवत्। क्षत्रियवत्। सन्[21], सनात्, सनत्, तिरस्, एते आद्युदात्ताः [22]पठ्यन्ते। [23]अन्तरा–अयमन्तोदात्तः। अन्तरेण, ज्योक्, कम्, शम्, सना, सहसा, विना, नाना, स्वस्ति, [24]स्वधा, अलम्, वषट्, अन्यत्, अस्ति, उपांशु, क्षमा, [25]विहायसा, दोषा, मुधा[26], मिथ्या। 'क्त्वातोसुन्कसुनः', कृन्मकारान्तः, [27]सन्ध्यक्षरान्तः, अव्ययीभावश्च। पुरा, मिथो, मिथस्, प्रबाहुकम्[28], आर्यहलम्[29], [30]अभीक्ष्णम्, [31]साकम्, सार्धम्, समम्, नमस्, हिरुक्[32]। तसिलादिः तद्धित एधाच्पर्यन्तः, [33]शस्तसी, कृत्वसुच्, सुच्, आस्-थालौ, च्व्यर्थाश्च, अम्, आम्, प्रतान्[34], प्रशान्। [35]स्वरादिः[36]। निपाता वक्ष्यन्ते––'प्राग्रीश्वरान्निपाताः' (१.४.५६/१९) इति। च, वा, ह, अह[37], एव, एवम्[38] इत्यादयः। अव्ययप्रदेशाः––'अव्ययादाप्सुपः' (२.४.८२/४५२) इत्येवमादयः। अव्ययम् इत्यन्वर्थसञ्ज्ञा।

---

1. प्रावरणम् फ. ह, प्रावरणीयमिति ड. 2. अयम् अनयोः ड. ई. 3. अस्मिन्नगरे ग. फ. ह. ई. 4. मध्यवचनो ग. 5. वेदं फ, नास्ति ग, गणसूत्रस्यैतावत् ह. 6. वाप्रकरणस्य क. ड. 7. ङित्सु वा उपसंख्यानम् ड, वा नास्ति अ. क. फ. ह. 8. स्वर् (तै. ५.५.५.३), अन्तर् (तै. ब्रा. १.१.५.१), प्रातर् (तै.आ. २.६.१). 9. निपात्यन्ते ग. ह, नास्ति ड. 10. सनुतर् नूनं (वा.सं.८.४) ह. 11. ऋधक् (ऋ. ९.१४.३०). 12. वाक्यमिदं नास्ति अ. 13. पठ्यन्ते नास्ति ड. 14. नक्तम् ग. 15. ईषत् नास्ति ग. 16. आविस् अवस् न स्तः क, अवस् नास्ति ह. 17. न्यक्षं होता पोता अर्धे सामि ऋते स्वयम् इत्यादयोऽन्तोदात्ताः पठ्यन्ते ग. ह. 18. अद्धा (ऋ. ३.५४.५), इद्धा नास्ति क. 19. सामि इत्येवमादयः क. 20. वत्यन्तं ग. फ. ई. 21. सन् नास्ति फ. ई, वनासतं क, सनातस् ह. 22. पठ्यन्ते नास्ति. 23. अन्तरयम् फ, नास्ति ई. 24. स्वधा अलम् न स्तः फ. ह. 25. विहायस् ह. 26. कथा फ. 27. सन्ध्यक्षरशून्यः फ. 28. प्रबाहुकम् (का. २९.६), प्रग् भुक् ग. 29. आर्यमलम् ह. 30. अभीक्ष्यम् ग. अभीक्ष्णम् ह. 31. साकम् नास्ति ह, साकम् समम् न स्तः अ, समम् नास्ति फ. ई. 32. हिरुक् (ऋ. १.१९४.१२), मनस् ग, मिथुनम् ह, मनसा फ. 33. शस्तसी नास्ति अ. फ. 34. प्रतान् नास्ति ई, प्रदान् ह. 35. स्वरादेः ब, एते स्वरादयः ग. 36. आकृतिगणश्चायम्। तेन अन्येऽपि। तथाहि––माङ् श्रम् कामम् (प्रकामम्) भूयस् परम् साक्षात् साचि (सावि) सत्यम् मङ्क्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम्। सन्ततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अमिथु विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् (अम्भर) अम्मर (अम्भर) स्थाने परम् दुष्ठु बलात् शु अर्वाक् शुदि वदि इत्यादि। तसिलादयः प्राक्पाशपाः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। मान्तः कृत्वोऽर्थः। तसिवती। नानाञौ इति––इति स्वरादिः गणः ड.। 37. अह्व ह, आह ई. 38. एवम् नास्ति फ.